# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**M.A./M.Sc. FIRST SEMESTER EXAMINATION, DECEMBER 2019**

**FIRST YEAR (BATCH 2019-21)**

Date : 14/12/2019 **SANSKRIT**

Time : 11.00 am – 1.00 pm **Paper : I [CC1]** Full Marks : 50

१. यथेच्छ**मेक:** प्रश्न समाधेय:। [1×12]

क) पुरुषसूक्ते पुरुषशब्दस्य कोऽर्थ: ? स च पुरुष: कथं सहस्राक्ष इत्युच्यते ? कथं सूक्तमिदं दार्शनिकसूक्तत्वेन विविच्यते ? [2+2+8]

ख) विश्वामित्रनदीसूक्ते यदनुपमं काव्यसौन्दर्यं प्रकटितं तत्सम्यग् विव्रियताम्।

२. यथेच्छ**मेक:** प्रश्न: समाधेय:। [1×8]

क) नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।

किमावरीव: कुह कस्य शर्म्मन्नम्भ: किमासीद्गहनं गभीरम्।।

ख) पावका न: सरस्वती वाजेभिर्वाजिनीवती।

यज्ञं वष्टु धियावसु।।

३. **दश** प्रश्ना: समाधेया:। [1×10]

क) का याज्या ?

ख) का नाम पुरोनुवाक्या ?

ग) "मण्डलादिषु आग्नेयमैन्द्रात्" इति वचनं केन रचितम् ?

घ) सरस्वती केन केतुना प्रचेतयति ?

ङ) किं नाम सत्रं भवति ?

च) "तुविजाता" इति पदं कयोर्देवयो: निगमा भवन्ति" – इति वचनं कस्मिन् ग्रन्थे दृश्यते ?

छ) "नव्विषयस्यानिसन्तस्य" इति सूत्रे नव् पदस्य क: अर्थ: ?

ज) कश्च निघात: ?

झ) वेदे इन्द्रविषयकाणि सूक्तानि केन छन्दसा विरचितानि ?

ञ) किं नाम स्तोत्रम् ?

ट) विश्वामित्रनदीसूक्तम् ऋग्वेदस्य कस्मिन् मण्डले वर्तते ?

ठ) विश्वामित्रनदीसूक्तस्य का खलु देवता ?

ड) "ताण्ड्यमहाब्राह्मणम्" इति कस्मिन् वेदे अन्तभवति ?

ढ) "कविक्रतु:" इति कस्य विशेषणम् ?

ण) "एहिमायास:" इति केषां देवानां विशेषणम् ?

त) नासदीयसूक्तास्य कः ऋषिः ? का च देवता ?

थ) "रजः" इति पदस्य कोऽर्थ आचार्येण सायणेन निरूपितः ?

द) पुरुषसूक्तस्य कः ऋषिः ? का च देवता ?

ध) विराजः कुतो। जन्म अभवत् ?

न) ब्राह्मणादीनामुत्पत्तिः पुरुषसूक्ते कथं वर्णिता ?

४. **<u>एकः</u>** प्रश्नः समाधेयः। [1×10]

क) "एतानि चत्त्वारि पदजातानि" – इत्यत्र चत्वारि इति पदस्य प्रयोगः कथं न व्यर्थः ? कः नाम भावः ? भावः कथं साध्यत्वेन अभिधीयमाना क्रिया इत्युच्यते। [2+1+7]

ख) किं नाम निरुक्तम् ? कथं शास्त्रमिदं श्रोत्रमुच्यते ? कथञ्च शास्त्रमिदं व्याकरणस्य कात्स्न्र्यं स्वार्थसाधकञ्च भवति इति दुर्गवृत्तिमवलम्ब्य वैशद्येन विवृणुत ? [1+1+8]

५. **<u>पञ्च</u>** प्रश्नाः संक्षेपेण समाधेयाः। [5×2]

क) यास्कमतानुसारं नामाख्यातयोः लक्षणं किम् ?

ख) प्रत्यक्षकृतमन्त्रलक्षणं सोदाहरणं लिखत।

ग) आध्यात्मिकमन्त्रलक्षणं सोदाहरणं लिखत।

घ) यास्काचार्यं विहाय अन्येषां निरुक्तकाराणां नामानि लिखत।

ङ) "यद्वा समाहृता भवति" – इत्यस्य सूत्रस्य कोऽर्थः ?

च) "वर्धते" इति पदस्य कोऽर्थः ?

छ) कः मन्त्रः ? का च देवता ?

ज) "त्वमिन्द्रो बलादधि" इत्यस्य प्रत्यक्षकृतमन्त्रस्य लक्षणसंगतिः कथं सम्भवति।

झ) उपसर्गनिपातः च इत्यत्र कथं बहुत्वविवक्षा विहिता ?

ञ) निघण्टुः इति पदस्य निर्वचनं किम् ? का च वृत्तिः अत्र समाश्रिता ?

——— × ———